ओम्

विषय-सूचि:

विषयः	पृष्ठाङ्कः
शुभसन्देशः	v
आमुखम्	vii-viii
भूमिका	xiii-xxxviii

गाङ्कटादिपादे (प्रथमाध्याय-द्वितीयपादे) प्रथमः सर्गः- 1-24

नायकस्य कृतवीर्यसूनोरर्जुनस्य गुणानां वर्णनम्। ततश्च तस्मिन् भूमिं शासति शरदागमन-प्रस्तावेन शरदृतु-वर्णनम्।

भूवादिपादे (प्रथमाध्याय-तृतीयपादे) द्वितीयः सर्गः- 25-46

अर्जुनस्य शरदृतु-शोभावलोकनार्थं राजधानीतो नर्मदां प्रति प्रस्थानोप-क्रमः। राजमार्गे पुरसुन्दरीणामौत्सुक्येन राजदर्शनार्थमागमनम्। नारीणां मिथोऽर्जुनस्य गुणानां सङ्कथा।

आकडारादिपादे (प्रथमाध्याय-चतुर्थपादे) तृतीयः सर्गः- 47-60

सेनया सह माहिष्मत्या निर्गतस्य राज्ञः कार्त्तवीर्यस्य वने मृगया-विहारः।

समर्थपादे (द्वितीयाध्याय-प्रथमपादे) चतुर्थः सर्गः- 61-76

राज्ञोऽन्तःपुरनारीभिः सह नर्मदाजल-विहारः।

पूर्वादिपादे (द्वितीयाध्याय-द्वितीयपादे) पञ्चमः सर्गः- 77-84

सूर्यास्तमयवर्णनं सन्ध्यावर्णनञ्च।

अनभिहितपादे (द्वितीयाध्याय-तृतीयपादे) षष्ठः सर्गः- 85-107

चन्द्रोदयवर्णनं विप्रलम्भवर्णनं रात्रिक्रीडावर्णनञ्च।

द्विगुपादे (द्वितीयाध्याय-चतुर्थपादे) सप्तमः सर्गः- 108-123

प्रतिनायकस्य रावणस्य राजसभायां भुवं भ्रान्त्वा प्रत्यावृत्तेन चार-मण्डलेन कार्त्तवीर्यैश्वर्यस्य वर्णितम्। तच्छ्रुत्वा क्रुद्धस्य रावणस्यार्जुनविजयाय तद्राजधानीं माहिष्मतीं प्रति प्रस्थानम्।

प्रत्ययपादपूर्वार्धे (तृतीयाध्याय-प्रथमपादे) अष्टमः सर्गः- 124-141

विमानगतस्य रावणस्य माहिष्मतयाः सौन्दर्यस्य समृद्धेश्चावलोकनम्। तादृशीं नगरीं दृष्ट्वा ईर्ष्याकषायितचित्तस्य कुपितस्य दशाननस्य युद्धाह्वानायार्जुनं प्रति शुकस्य दूतरूपेण प्रेषणम्। कार्त्तवीर्यो नगरीं विहाय नर्मदाजलविहाराय गत इति शुकेनागत्य सूचितम्।

सन्ध्ययणपादोत्तरार्धे (तृतीयाध्याय-प्रथमपादोत्तरार्धे) नवमः सर्गः- 142-155

रावणसैन्यवर्णनं विन्ध्यपर्वतवर्णनञ्च। ततश्च रावणस्य नर्मदा-तीरागमनम्, नर्मदावर्णनम्, रावणस्य नर्मदास्नानम्।

कर्मण्यण्पादपूर्वार्द्धे (तृतीयाध्याय-द्वितीयपादपूर्वार्द्धे) दशमः सर्गः- 156-167

रावणस्य नर्मदातटे पुष्पोपहितस्य शिवलिङ्गस्यार्चनम्। ततः कियद्दूरे नर्मदाजलविहार-निरतस्य सहस्रार्जुनस्य बाहूनां सहस्रेण नर्मदाजलस्य संरोधः। प्रतीपगामिना जलेन रावणस्य पूजासामग्र्याः प्रवाहणम्। तद् दृष्ट्वा प्रचण्डकोपो रावण एतस्य कारणं ज्ञातुं शुकं प्रेषितवान्।

कर्मण्यण्पादपश्चार्धे (तृतीयाध्याय-द्वितीयपादपश्चार्धे) एकादशः सर्गः 168-180

सानुजस्य शुकस्य नर्मदातटमार्गेण जलविहारव्यापृतं सहस्रार्जुनं प्रति प्रस्थानम्। कार्तवीर्यस्य सलीलं सलिलावगाहं बाहुसहस्रेण नदीजलावरोधं च सविस्मयं दृष्ट्वा शुकेन प्रत्यागत्य सकलवृत्तान्तः रावणाय निवेदितः।

उणादिपादे (तृतीयाध्याय-तृतीयपादे) द्वादशः सर्गः- 181-203

रावणस्य हैहयराजमर्जुनं प्रति युद्धार्थनाय शुकस्य दूतरूपेण प्रेषणम्। काननमार्गेण कार्त्तवीर्यराजधानीं प्राप्य शुकस्यार्जुनं प्रति रावणपराक्रमवर्णन-पुरस्सरं तत्सन्देशस्य कथनम्।

धातुसम्बन्धपादे (तृतीयाध्याय-चतुर्थपादे) त्रयोदशः सर्गः- 204-219

राजसभायां रावणदूतस्य शुकस्य वचनं श्रुत्वा कार्त्तवीर्यमन्त्रिणः प्रत्युत्तरम्। तच्छ्रुत्वा कुपितस्य शुकस्य मन्त्रिणं प्रति कटुभाषणं रावणशौर्यस्य वर्णनञ्च। तेन सभागत–सुभटवृन्दस्य कोपसंरम्भो युद्धौत्सुक्यञ्च। सुभटैर्दूतस्य निग्रहोपक्रमः, राज्ञा कार्त्तवीर्येण सङ्केतद्वारा दूतनिग्रहणस्य निषेधः। शुकस्य निर्गमनम्।

ङ्याप्प्रातिपदिकपादे तेन रक्तपादे च (चतुर्थाध्यायस्य प्रथमे द्वितीये च पादे) चतुर्दशः सर्गः- 220-237

दशाननदूते गते राजसभायां सहस्रार्जुनस्य रावणनिग्रहणे मन्त्रणा, पापिष्ठत्वात्तस्य निग्रहणनिर्णयः। रणभेरीनादः सैनिकानां सन्नाहश्च। सेनया सह राज्ञो रणभूमिं प्रति प्रस्थानम्।

युष्मदस्मत्पादे प्राग्वहतेष्ठक्पादे च (चतुर्थाध्यायस्य तृतीये चतुर्थे च पादे) पञ्चदशः सर्गः- 238-247

रावणपक्षे युद्धपटहनादेन सह युद्धाय प्रस्थानोपक्रमः। रावणं युद्धाद् वारयितुं मन्दोदर्या रावणस्यानुनयनम्। रावणस्य मन्दोदरीप्रार्थनावहेलनं कृत्वा स्वलोकोत्तरप्रतापवर्णनपुरस्सरं युद्धाय प्रस्थानम्। तस्यानिष्टचेष्टासूचनाय मन्दोदर्याः पुलस्त्याश्रमगमनम्।

प्राक्क्रीताच्छपादे धान्यानां पादे च (पञ्चमाध्यायस्य प्रथमे द्वितीये च पादे) षोडशः सर्गः-

रावणार्जुन-सेनयोर्मध्ये तुमुलसङ्ग्रामः। तत्र राक्षसपक्षक्षयः। सूर्यस्तमनवेलायां युद्धविरामः। 248-264

प्राग्दिशीयपादे पादशतादिपादे च (पञ्चमाध्यायस्य तृतीये चतुर्थे च पादे) सप्तदशः सर्गः-

सूर्यास्तमयवर्णनम्। तदानीमुभयोः सेनयोः स्वस्वशिविरागमनम्। चन्द्रोदयवर्णनम्। सहस्रबाहु-भटानां रात्रिक्रीडाया वर्णनम्। रावणमन्दोदर्यो-र्विप्रलम्भवर्णनम्। 265-285

एकाचो द्वे पादे (षष्ठाध्याय-प्रथमपादे) अष्टादशः सर्गः-

सूर्योदयवर्णनम्। द्वितीयदिवसेऽपि युद्धाय भटानां सन्नाहः। संग्रामोत्सुकान् भटान् दृष्ट्वा अनिष्टाशङ्कातङ्कितानां तन्नारीणां कातरतावर्णनम्। सहस्रार्जुनस्य सेनया सह रणभूमिं प्रति प्रस्थानम्। तत्र नर-राक्षससेनापत्योर्द्वन्द्व-युद्धवर्णनम्। कार्त्तवीर्यस्य रणे रावणसम्मुखगमनम्। 286-296

अलुगुत्तरपादे (षष्ठाध्याय-तृतीयपादे) एकोनविंशः सर्गः- 297-314

कार्त्तवीर्य-रावणयोर्युद्धवर्णनम्। नानास्त्रप्रयोगेण लोमहर्षणसंग्रामः। अन्तेऽर्जुनेन दशास्यस्य चापध्वजातपत्राणां छेदनम्। ततो रथादवतीर्णेन खड्गहस्तेन रावणेन सहार्जुनस्य खड्गयुद्धारम्भः।

अङ्गपादे (षष्ठाध्याय-चतुर्थपादे) विंशः सर्गः- 315-338

कार्त्तवीर्यरावणयोः खड्गयुद्धवर्णनम्। रावणस्य खड्गभङ्गे गदाग्रहणम्। ततो द्वयोर्गदायुद्ध-वर्णनम्। राज्ञा प्रहृतस्य रावणस्य मूर्च्छाधिगमः। शुकस्य विलापः। कियत्कालानन्तरं मूर्च्छापगमे पुना रावणस्य गदायुद्धम्। अर्जुनेन रावणस्य गदाया भञ्जनम्। द्वयोर्भुजयुद्धवर्णनम्। कार्त्तवीर्येण भुजपाशद्वारा वशीकृत्य रावणस्य बन्धनम्।

युवोरनाकपादे (सप्तमाध्याय-प्रथमपादे) एकविंशः सर्गः- 339-348

ततः शुकसारणयोः पुलस्त्याश्रमं गत्वा मुनये रावणबन्धन-वृत्तान्तस्य निवेदनम्। मन्दोदरीविलापः। पुलस्त्यकृतं रावण-गर्हणम्।

सिचि वृद्धिपादे (सप्तमाध्याय-द्वितीयपादे) द्वाविंशः सर्गः- 349-370

पुनरपि मन्दोदरीसमक्षं पुलस्त्यकृतं रावण-गर्हणम्। शुकसारणयोः रावणविमोक्षाय पुलस्त्यं प्रति प्रार्थनम्। पुलस्त्यस्य रावणं विमोचयितुमाश्रमात् कार्त्तवीर्यपुरीं प्रति प्रस्थानम्।

हेलिक्कापादे (सप्तमाध्याय-तृतीयपादे) त्रयोविंशः सर्गः-

इतो निर्गते हैहयराजस्य बद्धं रावणमादाय वन्यमार्गेण राजधानीं प्रति आगमनम्। 371-384

णौ चङ्यादिपादे (सप्तमाध्याय-चतुर्थपादे) चतुर्विंशः सर्गः-

सेनासहितस्यार्जुनस्य पुरीप्रवेशवर्णनम्। जितारेः कार्त्तवीर्यस्य दर्शनार्थमुत्सुकानां नारीणां राजमार्गनिर्गमनम्। मिथो हैहयराजस्य गुणानां चर्चा। पराजितस्य कारागारबद्धस्य रावणस्य म्लानताया वर्णनम्। गृहागतानां भटानां रात्रिक्रीडाया वर्णनम्। 385-399

सर्वस्य द्वे पादे पूर्वत्रासिद्धपादे च (अष्टमाध्यायस्य द्वितीये तृतीये च पादे) पञ्चविंशः सर्गः-

कार्त्तवीर्यस्य राजसभाया वर्णनम्, तत्र पुलस्त्यागमनम्। आतिथेयेन राज्ञा पुलस्त्यस्य सत्कारकरणम्। 400-411

मतुवसो रु पादे (अष्टमाध्याय-तृतीयपादे) षड्विंशः सर्गः-

पुलस्त्येन राजसभायां कार्त्तवीर्यस्य श्लाघनं रावणस्य गर्हणं च। ततः कार्त्तवीर्येण सह तस्य मैत्रीसम्पादनमेव क्षेमकरमिति पुलस्त्यकथनं निशम्य राज्ञार्जुनेन कारागाराद् राजोचितसम्मानपुरस्सरं रावणस्यानयनम्। पुलस्त्येन द्वयोर्हस्तमेलनपुरस्सरमग्निसाक्षिक-सख्यस्य सम्पादनम्। 412-424

रषाभ्यां पादे (अष्टमाध्याय-चतुर्थपादे) सप्तविंशः सर्गः-

सुहृद्भूतयोः नरेन्द्र-राक्षसेन्द्रयोः पुलस्त्यनिर्देशेन राजसभे एकासनोपवेशनम्। अर्जुनो भूयोऽपि मुनीश्वरं पुलस्त्यं प्रति दर्शनानुग्रहाय कृतज्ञतां प्रकाशितवान् उक्तवांश्च- भगवन्! इतः परं किमत्रभवतोऽभीष्टं करवाणि? तच्छ्रुत्वा सन्तुष्टस्य पुलस्त्यस्य रावणेन सह प्रस्थानाभिलाषस्य प्रवेदनम्। ततः कार्त्तवीर्येण ससम्मानं समालिङ्ग्य विसर्जितस्य दशाननस्य पितामहेन पुलस्त्येन सह पुष्पकविमानद्वारा प्रस्थानम्। 425-436

प्रथमं परिशिष्टम्- त्रिभागे टीकाग्रन्थे नामग्राहं स्मृता ग्रन्था ग्रन्थकाराश्च 437-438

द्वितीयं परिशिष्टम्- उद्धरणसूचिः-

अर्जुनरावणीय-टीकाभागे विद्यमानानाम् उद्धरणानां सूचिः 440-466

तृतीयं परिशिष्टम्- टीकोपजीव्यमूलग्रन्थे खण्डित-सङ्कीर्णपाठाः 467-470

चतुर्थं परिशिष्टम्- अर्जुनरावणीय-पद्यानुक्रमणिका 471-493

पञ्चमं परिशिष्टम्- सन्दर्भग्रन्थसूचिः 494-498

[ति. (तिरुवनन्तपुरम्)-मातृकाविवरणम्] 499